


पत्र
22 - ७८

नं. २२ घ
सिद्धांतचन्द्रिका
सारस्वतटीका
७८ पत्र





ॐ श्रीगणेशाय नमः ॐ नमः सरस्वत्यै ॐ नमस्कृत्य महेशानं मतंगह्वायनं जलेः वाणीशाणी
नसूत्राणां कुर्वे सिद्धांतचंद्रिकाम् ॐ श्रीगुरवे नमः अइउऋऌसमानाः अनेनक्रमेणैते व
र्णाज्ञेयाः नैव समानसंज्ञाः स्युः नैतेषु सत्रेषु संधिरनुसंधेयो विवक्षितत्वात् विवक्षितस्तु संधिर्भ
वतीति नियमात् ह्रस्वदीर्घप्लुतभेदाः सवर्णाः एतेषां ह्रस्वदीर्घप्लुतभेदाः सजातीयाः परस्परं
सवर्णा भण्यंते अस्पवर्णाश्च एकमात्रो ह्रस्वः द्विमात्रो दीर्घः त्रिमात्रः प्लुतः व्यंजनं चार्द्धमात्र
कम् एऐओऔ संध्यक्षराणि उभये स्वराः अकारादय एकारादयश्च ह्रस्वदीर्घप्लुतभेदाः स्वरा
उच्यंते अवर्णो नामिनः अवर्णवर्जाः स्वरा नामिन उच्यंते हयवरल् ञमङणनम् झभघढधष जबगडद
खफछठथ चटतकप शषस आद्यंताभ्याम् आद्यंतौ वर्णौ मध्यगानां नामाभ्यां सहिता
नो संज्ञाः स्युः अच् कभ जबचप एवमन्येपि कार्या येन कार्यं विधानमुच्चार्यमाणो वर्णोऽ
त्संज्ञको भवति यस्येत्संज्ञा तस्य लोपः अमक्कारश्चानेत्लोपः वर्णविशेषो लोपः प्रत्ययादर्शो
नेलुक् स्वरानंतरा हसाः संयोगः ऋवर्णऌवर्णाः ऋकारस्य पंचवर्णपरिग्रहार्थः अएओना
मिनो गुणाः अएओ एते गुणसंज्ञकास्तु नामिनः स्थाने भवंति आऐऔ वृद्धिः आऐऔ एते
वृद्धिसंज्ञकाः अंत्यस्वरादि टिः अंत्योपः स्वव्यंजनादि वर्णो टिसंज्ञको भवति अंत्यात्पूर्व उपधा
अंत्याद्वर्णात् पूर्वो यो वर्णः स उपधासंज्ञको भवति ह्रस्वो लघुः विसर्गानुस्वारसंयोगपरो



प्लुतः दीर्घश्च मुखनासिकावचनोऽनुनासिकः विभक्त्यन्तं पदम् नपरः स्वसमानकालस्वर्णोस्य सं

ज्ञा इति संज्ञाप्रकरणम् श्रीगणेशाय नमः इयं स्वरे इवर्णो यत्वमापद्यते स्वरे परे इ से ई सः

स्वरात्परो रेफहकारवर्जितो हसो हसे परे वसाने च वा द्विर्भवति कुभेजवाः कुसानां कुभे परे ज

वा भवंति वर्ग्याणां वर्णानां सवर्णाः स्वरहीनं परेण संयोज्यम् अधिरिद्धं वद्विरं गमं तरेतो दध्यानय न

वा यवलानां वा द्वित्वं वाच्यः दध्यानय दध्य्यानय दध्यानय दध्याधयोरिदिः स्वरपूर्वाद्रेफात् हकाराच्च परो

यणो वा द्विर्भवति गौर्य्यत्र गौर्यत्र नद्यास्ति नद्यास्ति स्वरात्स्थितविभाषया शास्त्रस्य स्यापि द्वित्वम्

पार्श्वमवर्णं स्यादि उवस् स्वरे मध्वत्र मध्व्वत्र मद्ध्वत्र मधत्र स्वरेषु ट्टं पदे सर्वो नवा द्वित्वं वत्ते लीयम्

ऋरम् स्वरे पित्रर्थः लृलम् स्वरे लवर्णः पेयय् स्वरे नयनम् ओयव् स्वरे भवनम् गोयवाप दांते

स्वरे टिक्तिलावायेनयावेक्कयो गवाग्रम् गोग्रम् गोयग्रम् इंद्रादयोश्च इंद्रादयोः परयोगोर


निंत्यम् गवेंद्रः गवात्तः पेयाय् स्वरे नायकः ओयाव् स्वरे पावकः कुवित्वावयकारः गम्


तिः कोशाग्रताम् ग्रम्यत्र गोमूतिः तपंजयेशकार्ये ग्रग्यत्तेयपापमज्ञेयमनः कुप्य स्त्रदये

कुपायेंप्रसारितेकुप्यम् कुयमन्यत अतादेबृद्धिराणादावगवकुल्याः अतोहि रणीसेना शोढः शो

ढिः सैरम् स्वरीसैविणी घोलोयश्चापदांते पदांतेस्थितानामयादीलोपकारवकारयोलोप

शावा भवति नयागताः नयागताः पटइह पटविह तस्माइदम् तस्मायिदम् ताइह ताविह लो







सा
वं
२


2

पदशिष्टत्वेनसंधिः लोपेतभवति स्यादेरितिनिर्देशात् तामोदरः एताश्च पदोन्तेन ः पदान्तेस्थितादेका
रादोकाराच्चपरस्याकारस्यलोपोभवति नेचपरोत्र गोअग्रं गोग्रमिनम् गवाग्निनम् गोग्निनम्
सवर्णेदीर्घःसह समानस्यसवर्णेपरेसहदीर्घोभवति श्रद्धात्र दैत्यादिः दधीह श्रीशः भानूदयः
होतृकारः ऋतिसवर्णेऋवा होतॄकारः होतृकारः लृतिसवर्णेलृवा होतॢकारः होतृकारः
सामान्यशास्त्रतोनूनंविशेषोबलवान्भवेत् परेणपूर्वबाधोवाप्रायशोदृश्यतामिह हलादेशेषा
दोटेलोपोवक्तव्यः हलीषालांगलीषामनीषाश्चयोम् शकंधुः कर्कंधुः कुलटापतितिसारंगः प
शुपतिगणाः सारंगोमृः सीमंतः केशविन्यासेसीमान्तोन्यः ओत्वोष्ठयोः समासेवा स्थूलोतुः ओ
ओष्ठे अवर्णादोकारेओकारेवपरेसहऔकारोभवति स्थूलोतुः बिम्बोष्ठः बिंबौष्ठः समासेकिम्
तवौष्ठः पदादादौधातोश्चवर्णान्तोपसर्गस्यलोपः प्रेजति उपोजति पदादादौनामधातोवा उपो
उकीयति उपौदकीयति प्रोघीयति प्रौघीयति पन्त्योपस्मोने उपैति उपैधते प्रस्यैषैष्ययोर्न प्रेषः
प्रेष्यः प्रस्यकिम् अपेषः पदेनवाधाबाधो अपेव अवधारणेनुअपेव अइए अवर्णादिवर्णेपरेसह
एकारोभवति ममेदम् उओ अवर्णादुवर्णेपरेसहओकारोभवति गंगोदकम् एएऐ अवर्णादेका
रेएकारेचपरेसहऐकारोभवति तवैषा तवैश्वर्यम् अऋअर् अवर्णादृवर्णेपरेसहअर्भवति हस्मात्
रस्यान्त्यस्यलोपोवासवर्णेकसे तवर्द्धिः तवर्धिः तवॠद्धिः अवर्णान्तादुपसर्गादृकारादौधातावार्



उपार्छति प्रार्छति अवर्णादृतेपरेतृतीयासमासे सुखार्तः शीतार्तः तृतीयासमासेकिम् परम
र्तः प्रवत्सतरकम्बलवसनार्णादशानामृणे प्रार्णम् वत्सतरार्णम् कम्बलार्णम् वसनार्णम्
दशार्णम् ऋणार्णम् उपसर्गादेर्नामधातौवा आर्षभीयति प्रर्षभीयति लृग्रहणं अवर्णाल्लृवर्णेप
रेसह अल्भवति तवल्कारः तवल्कारः तवल्कारः तवल्कारः लृदादौनामधातौवाल् शाल्का
रीयति यवल्लाययोर्द्विर्वा प्राल्कारीयति प्रल्कारीयति शाल्कारीयति इति स्वरसंधिः २ नामी
अदसोमीशब्दः संधिंनयाति अमीअश्वाः अमीआदित्याः ईदूदेद्द्विवे ईकारान्तमूकारान्तमेकारान्तम्च यद्द्विवे
वर्तमानः संधिंनयाति अग्नीअत्र पटूअत्र मालेअत्रपचेतेइमौ ओनिपातः स्वरेनिपातः संधिंन
याति अअपेहि इइन्द्रंपश्य उउत्तिष्ठ आएवंमन्यसे ओदन्तोनिपातश्च अहोईशाः आहोआगताः
ओदन्तोधाविनौ विष्णोइतिविष्णविति ऋतांसमसवर्णेस्वरेसमासेपदान्तेवाह्रस्वः वर्किमत्र व
अत्र वर्कोत्र मधुपनत मधेनत कर्तृऋदम् कर्त्रिदम् पदान्तेकिम् गोर्यो ह्रस्वविधानसा
मर्थ्यात्संधिः समासेतुह्रस्वोयम् पदान्तानांसमानानामृतिल्टलिवाह्रस्वः ब्रह्मऋषिः ब्रह्म
र्षिः देवीऋषिः देव्यृषिः वधूऋकारः वध्वृकारः होतृऋकारः होतृकारः होतृॡकारः पदान्ता
नांकिम् प्रार्छति नपाउजोर्वेवास्वरे किमुअकम् किम्वकम् ह्यादादानेटेः सुनः ह्यान्त
रीयनेयद्दादासेनन्देवासतः सुनः संधिंनयाति परिदेवदमाजायीय परिदेवदम् २ प्रयायीय







सा
वं
१

ईईश्रयोगे ईद्दयोः सनोवा ईश्रन्नहायनं ईईशा ह्यीशा समम्यर्थेइने संधिं ध्यानि चातश्रमीश्रा
न्ते पपीड्दम् पपीपषः इत्नोवाचनः उद्गतिविति श्रलुनवदितो देवदत्तेति गुरोरमत्तो नेनस्यापि
वापर्यायेणसतः दे २ वदत्त देवद २ त्त देवदत्त २ गुरोः किम् वकारादकारस्य माभूत् श्रनृतः कि
मकृष्णः इतिपूर्वृत्तिभावः १ चपाश्रयेजवाः परतोवर्तमानाश्चपाजवाभवंति श्रवेपरेषट्टष
ण्णम षण्मुम वाड्मधुरा वाग्मधुरा ञमेञमावा परतोवर्तमानाश्चपाञमेञमावाभवंति श्रम
येञमेनित्यंजवस्यापि तन्मयम् चिन्मयम् चपाच्छः शः चपादुत्तरस्यशकारस्यछोवाभवति
श्रवेपरे वाकश्लूरः वाकछ्लूरः श्रवेकिम् वाक्श्च्योतति होऽभ्याः चपादुत्तरस्य हकारस्यभ्यावा
भवंति [illegible] भवति [illegible] वाग्घविः वाग्हविः [illegible]
[illegible] लाति [illegible] लाति [illegible] शकारतवर्गयोः शकारचवर्गौ
[illegible] शकारचवर्गौभवतः [illegible] कष्टं [illegible]
[illegible] शकारादुत्तरस्यतवर्गस्य [illegible] भवति [illegible] षकारतवर्गा
योः षकारटवर्गाभ्यांयोगेषकारटवर्गौभवतः [illegible] षकारेपरेतवर्गस्य
[illegible] भवति [illegible] परतोऽटवर्गात्परस्य [illegible] भवति [illegible]
[illegible] लिट्त्स [illegible] तवर्गस्य


वाग्पष्पा


२






लकारे परे लकारो भवति तल्लुनाति भवांल्लिखति अनुनासिकाननुनासिकत्वेन यवला द्वि
धा तत्र नकारस्यानुनासिको लकारः उदः स्थास्तंभोः सलोपः उत्थानम् उत्तंभनम् नःसक्का
ते नोन्तस्य पदस्याव परे छते स सगमो भवति राजं श्छिदम् भवान्तनोति भवांस्तनोति चवेप
रे किम् सन्त्सरुः नश्शाम्शः प्रशान्तनोति शोचयवा नोन्तस्य पदस्य चो परे वा च सगमो भवति
भवां ष्टैरः भवा ः भवांश्चारः भवान्चारः ङ्णो ह्रस्वाद्विः स्वरे ङकारणकारनकाराः ह्रस्वा
दुत्तरा द्विर्भवन्ति स्वरे परे पदान्ते प्रत्यङ्ङिदम् सुगण्णिह राजन्निह छः ह्रस्वात्परश्छकारो द्विर्भवति
स्वरे नपाकस्यानाम् कस्मान्नो स्वरे परे वा भवति तवच्छत्रम् हीचोन ह्रीच्छति पदान्ताद्वा दी
र्घात्पदान्ताद्वा लक्ष्मीच्छाया लक्ष्मीछाया माङ्मोः नित्यम् माच्छादयति माच्छिदत् पुंसोवपरे
स्वपे संयोगान्तस्य लोपो न पुंस्कोकिलः पुंस्पुत्रः अवपरे किम् पुंक्षीरम् स्वपे किम् पुंदासः ख्या
धान्तेवा पुंस्ख्यानम् पुंख्यानम् मोनुस्वारः मकारस्यानुस्वारो भवति हसे परे पदान्ते तं हसति
पदेव्यथा नस्यापदान्ते कसे नस्य मस्य चापदान्ते वर्तमानस्यानुस्वारो भवति कसे परे हकारे च यथा
शांसि पुंसु स्वनडुंहि यमाय पेस्य अनुस्वारस्य यमा भवति यपे परे यस्य परस्य सवर्णः यांतः यङ्
कितः संवितः कांदितः वा पदान्ते पदान्ते वर्तमानस्यानुस्वारस्य ज्ञमावा भवति अस्य यपस्य सव
र्णः त्वं करोषि त्वङ्करोषि तंतनोति तन्तनोति संयन्ता संयंता संवत्सरः संवत्सरः यंलोकम्






सा. वि. ५

यल्लोकम् किंवंतेराजन्तोपदेसे मेमकारस्य मपवस्यात् सम्राट् यवलमनपरे हकारे मस्य यवल
मनावा किंय्ह्यः किंह्यः किंव्ह्वलयति किंह्वलयति किंल्ह्लादयति किंह्लादयति किम्ह्मलय
ति किंह्मलयति किन्ह्नुते किंह्नुते शसे चपरस्याद्वितीयो वा वत्स्सरः वत्सरः अप्प्सराः अप्सराः न
परोते नस्य धः ककटकवर्जितस्य विभक्तौ न भवन्ति इत्यस्यापवादः षट्सन्तः षट्सन्तः सन्त्सः
सन्त्सः शसेङणोः ककटकौ वा प्राङ्क्षष्ठः प्राङ्षष्ठः प्राङ्क्शेते प्राङ्शेते सुगण्ट्षष्ठः सुगण्षष्ठः सुगण
षष्ठः यकारे रेफे नत्र कारस्य सत्वा स्तोर्विसर्गः सकाररेफयोर्विसर्जनीयादेशो भवति यथा नो
रक्षेपरे तेच ऊष्मोः कपौ वा कवर्गपवर्गसंबंधिनि खे परे विसर्जनीयस्य ककपौ वा भवतः
नृः पाहि नॄपाहि नॄन्पाहि इति हल्संधिः विसर्जनीयस्य सः खसे परे कस्तनोति शसपरे खसे
विसर्जनीयस्य विसर्ग एव कः त्सरुः कः प्सातां चनाचनः लोभगाः शासे वा स्तोः श्चुभिः श्चुः क
पशाः कफ्षष्ठः कः प्सुरः कः षष्ठः कः साधुः कस्साधुः खे परे शसे विसर्गलोपो वा हरिस्फुर
ति हरिः स्फुरति हरिस्फुरति ऊष्मोः कपौ वा कः करोति कः पचति वाचस्पत्यादयो निपात्यन्ते
वाचस्पतिः बृहस्पतिः तस्करः कौतस्कुतः कान्कान् कांस्कान् भास्करः परस्यात्रम् यशस्क
ल्पम् यशस्कम् यशस्कामयति सर्पिष्पाशम् सर्पिष्कल्पम् सर्पिष्कम् सर्पिष्काम्यति नमस्करोति
निष्प्रत्यूहम् आविष्कृतम् तिरस्कृतो द्विष्करोति द्विः करोति एवं त्रिष्करोति चतुष्करोति चतुष्क ५




पालम् सर्पिष्करोति सर्पिःकरोति यजुष्करोति यजुःकरोति सर्पिष्कुण्डिका सर्पिःकुण्डिका अ
यस्कारः अयस्कुंभः अयस्पात्रम् अयस्पारितकशा अयस्कशा अयस्कांसी अयस्पदम् पिर
स्पदम् आकृतिगणोयम् रोरात्रिष्वरूढो विसर्गस्य पदान्ते रो भवति न तु अहरादिषु अहर्गणः रा
त्र्यादिषु तु अहोरात्रम् अहोरथन्तरम् पदान्ते अहोभ्याम् धनोसः अकारान्तस्य विसर्गस्य उकारो
भवति अति परतः कोर्थः ह्रस्वे अकारान्तस्य विसर्गस्य उकारो भवति ह्रस्वे परे देवो याति मनोर
थः आदवे लोपश्च अवर्णान्तस्य विसर्गस्य लोपश्च भवति अवे परे देवाः अत्र देवा अत्र बालाः
यांति बाला यांति देवा इह स्वरे यत्वं वा देवायिह भोसः भोस् भगोस् अघोस् इत्येतेषां विसर्गस्य
लोपश्च भवत्यवे परे भो हरे भगो नमस्ते अघो याहि स्वरे यत्वं वा भो यहि भो एहि भगो इह भगो यि
ह नामिनो रः नामिनः परस्य विसर्गस्य रेफो भवत्यवे परे अग्निरत्र पटुर्वक्ता विसर्गस्य रेफप्रकृति
कस्य लोपे वा रेफः गीर्पतिः गीःपतिः गीः पतिः धूर्पतिः धूर्पतिः धूःपतिः अहरादीनां पत्या
दिषु वा रेफः अहर्पतिः अहःपतिः अहः पतिः रः रेफप्रकृतिकस्य विसर्गस्य रेफो भवत्यवे प
रे प्रातरत्र अंतर्गतः रि लोपो दीर्घश्च रेफस्य रेफे परे लोपो भवति पूर्वस्य च दीर्घः पुनारमते हरी
राजते भानू रम्यः सैषाद् ह्रसे सश्चाद्देषश्चाद्भ्याम् परस्य विसर्गस्य लोपो भवति हसे परे अकारो
तनञ्समासात् सचरति एषचरति अकारान्तेनेति किं एषको रुद्रः अनञ्समासेति किं असः शिवः

अघोअपगच्छ अघोयपगच्छ




सा
वे
विभक्त्यन्तरसिद्धं
5


मशाद्वाहिसर्गस्यलोपः स्वरेलोपएवपादः पूर्णश्चेत् सैषदाशरथीरामः सैषराजायुधिष्ठिरः सै
षकर्णोमहात्यागी सैषभीमोमहाबलः इतिविसर्गसंधिः इतिसंधिपंचकम् अथाराणोशा
यनमः अविभक्तिनाम विभक्तिरहितंधातुवर्जितंचार्थवत्शब्दरूपंनामोच्यते तस्मात्सिऔ
जस् अम्औशस् टाभ्यांभिस् ङेभ्यांभ्यस् ङसिभ्यांभ्यस् ङस्ओस्आम् ङिओस्सुप् तस्मान्नाम्नः
परः स्यादयः सप्तविभक्तयोभवंति एकत्वद्वित्वबहुत्वेषुएकवचनद्विवचनबहुवचनानि स्तो
विसर्गः देवः देवौ जसोजकारोजसीतिविशेषणार्थः देवाः अम्शसोरस्य समानात्परयोरम्श
सोरकारस्यलोपोभवत्यथातोः देवम् देवौ शस्सकारः शसीतिविशेषणार्थः सोनः पुंसः
पुंलिंगात्समानात्परस्यशसः सकारस्यनकारादेशोभवति नेत्वाम्यासीम्यात्वम् शसि श
सिपरेपूर्वस्यदीर्घोभवति यदादेशस्तदाभवतिनत्ववर्णोमात्रविधौ देवान् टाटकारः टेनेति
विशेषणार्थः टेन अकारात्परस्यटाइनभवतिदेवेन भ्यामि अकारस्यात्वंभवति भकारेपरेदेवा
भ्याम् भ्यः अकारात्परस्यभिसोभकारस्याकारोभवति अइए एऐ देवैः ङकारोङित्कार्या
र्थः ङेयक् अकारात्परस्यङेरयेतस्यातात्मोभवति देवाय देवाभ्याम् एस्मिबहुत्वे अकार
स्यैत्वंभवति सकारभकारादौपरेबहुत्वेसति देवेभ्यः ङसिरत् अकारात्परोङसिरद्भवति दे
वात्देवाभ्याम्देवेभ्यः ङस्स्य अकारात्परोङस्स्योभवतिदेवस्य ओसि अकारस्यैत्वंभवति



ओसिपरे देवयोः नुडागमः समानात्परस्यामो नुडागमो भवति ॥ पुंसि ह्रस्वादेव नामि नामिपरे
पूर्वस्य दीर्घो भवति देवानाम् देवे देवयोः किलान्तः सः कृतस्य कवर्गादिलाम्परस्य केन
विनान्तरेण कृतस्य सकारस्य षकारादेशो भवति ॥ अन्ते स्थितस्य न भवति देवेषु सिर्धिः आमन्त्रणे
सिर्धिसंज्ञो भवति समानाद्धेर्लोपो धातोः ह्रस्वात्समानाद्धेर्लोपो धातोर्न रस्य पेर्लोपो भवति यथा
तोः अभिमुख्याभिव्यक्तये हेशब्दस्य प्राक्प्रयोगः हे देव हे देवौ हे देवाः एवं नरपदरामसकुन्दकु
स्मादयः सर्वविश्वउभउभयअन्यअन्यतर इतरइतमअन्यतमसमसिमत्वत्वभवत नेम पूर्व
वरपरावरदक्षिणउत्तरअपरअधरस्वअन्तरत्यद्तद्यद्एतद् इदम् अदस् द्वि किम् युष्मद् अस्मद्
एते सर्वादयस्त्रिलिंगाः जसी सर्वादेरकारान्तात्परो जस् ई भवति सर्वे ॥ पूर्वोक्तेनैव षकारादे
फस्वर्गेभ्यः परस्य नकारस्य अपदस्थस्य णकारो भवति अन्ते स्थितस्य न भवति सर्वानित्या
दौ एवं कृतेनेपि अवग्रहाद्वारेण कवर्गेण पवर्गेण अन्तस्थारेण विसर्गेण कपाभ्यां व्यवधाने
व्यवधानेपि भवति नान्येन सर्वेण सर्वादेः स्मट् सर्वादेरकारान्तात्परस्य ङे इत्येतस्य स्मडागमो भव
ति सर्वस्मै अतः सर्वादेरकारात्परस्य आतः स्मडागमो भवति सर्वस्मात् सुडामः सर्वादेरवर्णान्ता
त्परस्यामः सुडागमो भवति सर्वेषाम् ङिः स्मिन् सर्वादेरकारात्परो ङिः स्मिन् भवति सर्वस्मिन्
सर्वयोः सर्वेषु हे सर्व एवं विश्वादयोप्येकशब्दान्ताः अन्यअन्यतमोऽन्यतरान्तः सन्देहतामः ए

वादीनां नवानां जसङसिङीङ्स्मात्स्मिनो वा पूर्वे पूर्वाः पूर्वस्मात् पूर्वात् पूर्वस्मिन् पूर्वे एवं परादय ः
शेषं सर्ववत् सर्वादिः सर्वकार्यी स्यात्चेद्योगोपवाभिधा पूर्वादिश्चव्यवस्थायां समासे तत्पुरुषोत्तरप
वि परिधाने बहिर्योगे स्वं योज्ञातधनवाच्यपि सर्वमतिक्रान्तोऽतिसर्वः तस्मै अतिसर्वाय देहि प्रियं स
र्वं यस्यासौ प्रियसर्वः तस्मै प्रियसर्वाय सर्वो नाम कश्चित् तस्मै सर्वाय अतिपूर्वाय समासे तत्पुरुषे
नवायोपि अन्तरे अन्तरा वा बाह्याः शाटकाः परिधानीया इत्यर्थः अन्तरे अन्तरा वा चण्डालगृहा बाह्या इत्यर्थः ग्रा
मयोरन्तरे नापमः मध्ये इत्यर्थः स्वाय धनाय ज्ञातये वा द्वंद्वे सर्वादीनां न सर्वकार्यं पूर्वापरावराणाम्
वा जसि वर्णाश्रमेतरे वर्णाश्रमेतराः तृतीयासमासे तृतीयासमासार्थवाक्ये च न मासपूर्वाय मासे
न पूर्वाय प्रथमचरमतयडल्पार्धकतिपयनेमानां जसि वा प्रथमे प्रथमाः चरमे चरमाः तयडयडौ
प्रत्ययौ तदन्तत्वं ते ग्राह्याः द्वितये द्वितयाः द्वये द्वयाः शेषं देववत् नेमे नेमाः शेषं सर्ववत् तीयस्य वा ङि
त्सु सर्वनामवद्रूपं ज्ञेयम् द्वितीयस्मै द्वितीयाय द्वितीयस्मात् द्वितीयात् द्वितीयस्मिन् द्वितीये एवं तृती
यः उभशब्दो नित्यं द्विवचनान्तः उभौ २ उभाभ्यां ३ उभयोः २ उभयशब्दस्य द्विवचनं नास्तीत्येके अस्ती
त्यन्ये उभयः उभयौ उभये उभयम् उभयौ उभयान् निर्जरः जरायां जरस्स्वरादौ वा षष्ठीनिर्दिष्टस्या
देशास्तदन्तस्य नेयः गृह्णीष्म सर्वस्य निर्दिश्यमानस्यादेशा भवन्ति एकदेशविकृतमनन्यवत् नि
र्जरसौ निर्जरसो निर्जरसः निर्जराः एतेषु सारो वदेववत् संख्याविसायपूर्वस्याह्नस्याहन्वा ङौ वेङोः







दौ॰

आतो धातोर्लोपः धातुसम्बन्धिन आकारस्य लोपो भवति शसादौ स्वरे परे सोमपः सोमपा॰


श्वनंतस्योपधाया वा लोपो भवति ईङ्योः परयोः वकारमकारांतसंयोगादनस्य न यज्वक्रिय
इति यज्वे वितनमहः यज्वनः यज्वक्रियः इति यज्वे सायाह्नि सायाहनि सायाह्ने पादंदंतनासिका
मासहृदयनिशासृजनृषन्दोषयकृच्छकृदुदकास्यमांसपृतनासान्नंतपदन्दन्मास्हृन्निशसन्पृषन्दो
षन्यकन्शकन्नुदन्नासन्नास्य शसादौ वा पदः पदा पद्भ्याम् पद्भिः दतः दता दद्भ्यां दद्भिः मासः मासा मा
भ्यां माभिः अल्लोपः स्वरेऽवयकारादेः असादौ अनंतस्योपधाया लोपो भवति शसादौ स्वरे परे वकारम
कारांतसंयोगादनस्य न प्लक्षः प्लक्षा नाम्नो नलोपोऽशिधौ नाम्नो नकारस्य लोपो भवति शिसप
दांते वा धौ प्लीहभ्यां प्लीहाभ्याम् एते पंचसवर्दवत् पदादयः पृथक्शास्त्रमित्येके सोमपाः सोमपौ सो
मपाः सोमपाम् सोमपाभ्यामित्यादि एवं कीलालपाः शंखध्मा मधुपा विश्वपा प्रभृतयः आतो धातोः कि
म् हाहान् हाहा हाहै हाहः हाहोः हाहाम् हाहे हाहासु हे हाहाः हरिः औ सूर् इकारांतादुकारांताच्च
परः औ अ आपद्यते हरी पशोनसि इकारांतस्योकारांतस्य च नसि परे एकार ओकारश्च भवति हरयः
घौ इकारांतस्योकारांतस्य च घौ परे एकार ओकारश्च भवति हे हरे हे हरी हरिम् हरीन् टाना
स्त्रियाम् इकारांतादुकारांताच्च परष्टा ना भवति न तु स्त्रियाम् हरिणा हरिभ्यां हरिभिः ङिति इका
रांतस्योकारांतस्य च ङिति परे एकार ओकारश्च भवति हरये हरिभ्याम् हरिभ्यः ङस्य पदोऽद्यामनव
स्वङसिङसोः अकारस्य लोपो भवति हरेः २ हर्योः हरीणां ङेरौरित् इदुद्भ्यां ङेरौ भवति म







सा. चं. ७


वदित् ङितिङेः ङितिपरेदेलौपोभवति हरौ हर्योः हरिषु एवमग्निगिरिरविकलिप्रभृतयः सख्या
दयः उकारांता विष्णुवायुभानुगुरवोरप्रभृतयः भानुः भानू भानवः हेभानो सेङोसेङेः सखि
शब्दात् देनाद्ध्यपरस्यसेरौङ्भवति सखा पेसख्युः सखिशब्दस्यनंदनस्यापोनेकारादेशोभवति
पिवनितेषुपंचस सखायौ सखायः सखायंसखायौसखीन् सखिपत्योरीङ् सखिपतिश
ब्दयोरीङागमोभवति टाङेङसिङसुपरतः टौचेन्नाज्ञानभवतिसख्यासख्ये ऋदुङ् सखिपतिशब्दयो
रुङागमोभवतिङसिङसोरुकारेपरे सख्युः उङः सकारांतात्परस्य ङसिङसोरुकारस्योकारोभव
ति सचरित ङितिङेः सख्युः सखिभ्यां सखिभ्यः सख्युः सख्योः सखीनाम् ङेरौङि ङितिङौस्थितेकृते
सखिपत्योरीङागमः सख्यौ सखिषु एवंभवेत् सखायसखायस्य सखिना प्रतिशब्दयितः सखा
प्रतिसखायपर[मः] सखायस्यमपरमसखायपरमसखायौपरमसखिना सखीमतिक्रांतः प्रति
सखिः इहङापेरंगकोन लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवग्रहणमितिन्यायात्पतिः
पत्यापत्येपत्युःपत्यो पतिः समासेहरिवत्भूपतये श्रीगमनमनित्यम् सखिना पतिना द्वि
शब्दोनित्यंद्विवचनांतः त्यदादेष्टेरस्यादौ द्वौ२ द्वाभ्यां२ द्वयोः२ संज्ञोपसर्जनयोनांत्वम् द्विनो
मकस्मिन् द्विः द्वौ द्वयः द्वावतिक्रांतो निद्विः श्रायात्मेत्परमद्वौ त्रिशब्दोनित्यंबहुवचनांतः त्रयः
त्रीन् त्रिभिः त्रिभ्यः२ त्रेस्त्रय् त्रिशब्दस्यत्रयादेशोभवति नामिपरे त्रयाणां प्रियत्रि द्विशब्दस्यव






क्रव्यः त्र्याणाम् एवम् त्र्याणाम् । कतिशब्दो नित्यं बहुवचनान्तः । डतेः डसंख्यायाः परयो
र्जस्शसोर्लुक् । प्रत्ययलोपे प्रत्ययलक्षणम् । लुकि तन्निमित्तम् । कति कति कतिभिः कतिभ्यः
कतीनां कतिषु । औडुलोमिः औडुलोमी लोम्नोऽपत्येषु बहुष्वकारः । उडुलोमाः औडुलोमिम् औ
डुलोमी उडुलोमान् । वातप्रमीः वातप्रम्यौ वातप्रम्यः वातप्रमीम् वातप्रम्यौ वातप्रमीन् वात
प्रम्या वातप्रमीभ्याम् वातप्रमीभिः वातप्रम्ये वातप्रम्यः वातप्रम्योः वातप्रमी वातप्रमीषु
एवं ययीपप्यादयः । किं वन्न वातप्रमी ग्रामण्या मिश्रासिद्धेच विशेषः । वातप्रम्यम् वातप्रम्यः
वातप्रम्य । घेवेति घः । ह्रस्वः श्रेयस्योपस्य वृक्षश्रेयसी वृक्षश्रीहोर्इयस्य प्रत्ययान्तस्य न ह्रस्वः
ईदूदन्तस्य य्वनुस्यान भिन्नस्य स्त्राख्यस्योपसर्जनन्वेपि स्त्रीकार्यं वक्तव्यम् । ह्रस्वः सेर्लोपः
ह्रस्वान्तादीवन्ताच्च परस्य सेर्लोपो भवति । घेर्ह्रस्वः इयुवुस्यानवर्णितयोरीदूतोः स्त्रीशब्दस्य च
स्त्रियां घौ परे ह्रस्वो भवति ह्रस्वविधानसामर्थ्याद्वा इति नेह वृक्षश्रेयसि वृक्षश्रेयसीम् वृक्षश्रे
यस्यौ वृक्षश्रेयसीन् । ङितामट् स्त्रियामीकारान्तादूकारान्ताच्च ङितामडागमो भवति वृक्षश्रे
यस्यै वृक्षश्रेयस्याः वृक्षश्रेयसीनाम् । स्त्रियां घोः इवर्णान्तादुवर्णान्तात् स्त्रियां वर्तमानात्पर
स्य ङेराम् आदेशो भवति वृक्षश्रेयस्याम् । भस्त्री वं नन्वाम्रसिलोपः श्रतिलक्ष्मीः हेश्रतिलक्ष्मीः
शेषं वृक्षश्रेयसीवत् । सखीः घोर्यान्ताद्विशवोसवे धान्नोरि वर्णान्ताद्योर्विशवो भवतः स्या







डौस्वरेपरे सुश्रियौ सुश्रियः एवंसुधीयवक्रीदयः सेनानीः ॥ यौवा ॥ अनेकस्वरस्यनान्नोधातो
रिवर्णोवर्णयोर्यकारवकारौभवतः स्वादौस्वरेपरे धातोरवयवः संयोगः पूर्वोयस्मात्तस्मा
न्नसोसपदस्यानेकस्वरस्यचेदुपसर्गकारकपूर्वस्यचनान्तपूर्वस्य वर्षाकरदन्तस्यपूर्वभूप
ञ्चादस्यभूशब्दस्यसधीशब्दस्यच न सेनान्यौसेनान्यः सेनानीभ्यांसेनानीभिः ङिपः नीशब्दा
दुत्तरस्यङेरामादेशोभवति सेनान्याम् एवंसुनीग्रथीग्रामण्यादयः धातुनासंयोगविशेषणा
त् उन्नौ उपसर्गकारकपूर्वस्यकिम् प्रामनियौ सपियौ अनेकस्वरस्यकिम् नियौनियाम्
कुमारीमिच्छन्कुमारीवाचरन् कुमारीनाद्दसेपेतिसिलोपः अमिशासिकुमार्यं कुमार्यौकुमा
र्यः शेषंवकृश्रेयसीवत् सखायमिच्छतिसखीयति ततः क्विप्प्रलोपयलोपौएकदेशविकृ
तस्यानन्यवत्वात् अपेत्वे सखासखायौसखायः हे सखीः सखायम् सखायौ सख्युः सख्युः
सख्यि सदृत्वेनवर्ततेसखेः नमिच्छतिसखीः सख्यौ सखनमिच्छतिसखी सुख्यौ खीतीभ्यांकृत
यादेशाभ्यांङस्यङः सख्युः सतः उकारस्यानन्तरात्णोरपिलूनमिच्छतिलूनीः लूभ्यः लामंप्र
स्तीसमिच्छतीतिस्तामीः स्ताम्यः प्रस्तीमीप्रस्तीम्यौप्रस्तीम्यः शक्वीः पक्वीः कृतयादेशाभ्या
वाज्ञोत्वमप्राप्तिः यः पक्तियः हूहूः हूह्वौ हूह्वः हूहूम् हूह्वोहूहून् वातप्रमीवत् एवंहन्भूः य
तिवभूः वर्षश्रेयसीवत् खलपूः खलप्वौ खलप्वः एवमलपुल्वादयः स्वयंभूः स्वयंभुवौ स्वयं




भुवः एवं स्वयम्भूकटप्रूखलपूकारभूप्रभृतयः वर्षाभूः वर्षाभ्वौ वर्षाभ्वः वर्षाभ्वम् वर्षाभ्वौ च
र्षाभ्वः एवं पुनर्भूदृन्भूकरभूप्रभृतयः सेराः ऋकारान्तात्परस्य सेराभवति सबुद्धित् पिता एवं सम
कारान्तस्याभवति पितरौ पितरः घेरर् ऋकारान्तात्परस्य घेरर्भवति सबुद्धित् हे पितः पितरं पि
तरौ पितॄन् मतोड्डः पितुः पित्रोः ङे ऋकारस्याभवति ङौपरे पितरि एवं जामातृभ्रात्रादयः नृर्वा
नामिदीर्घः नृणाम् नॄणाम् शेषं पितृवत् स्वसार् ऋकारान्तस्य सेर्वर्जितम् ऋकारस्याभवति एव
म् कर्ता कर्तारौ कर्तारः कर्तारं कर्तारौ कर्तॄन् उद्गातृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणां च
उद्गातारम् क्रोष्टुशब्दस्य पञ्चसु पितृवत् क्रोष्टा क्रोष्टारौ क्रोष्टारः क्रोष्टून् हे क्रोष्टो
हे क्रोष्टुशब्दस्य तृवद्वा क्रोष्ट्रा क्रोष्टुना क्रोष्ट्रे क्रोष्टवे क्रोष्टुः क्रोष्टोः क्रोष्ट्रोः क्रोष्ट्वोः ऋकारान्तत्वे से नौ।
यो विधिः स नित्यः नित्यानित्ययोर्मध्ये नित्यविधिर्बलवान् क्रोष्टूनाम् क्रोष्टरि क्रोष्टौ क्रोष्टोः क्रो
ष्ट्रोः क्रोष्टुषु सेः सयोस्सयुः हे सेः स्मृता ईले स्त्रीये नसस्मृतेः देसृभिः देशाद्व्यस्याकारादेशः सकार
मकारादौ विभक्तौ राः रायौ रायः राभ्यामित्यादि ओतौ ओकारस्यौकारो भवति पञ्चसु गौः गावौ
गावः हे गौः अम्शसि ओकारस्याऽऽत्वं भवति अम्शसि गां गावौ गाः इत्यस्य गोः एवं स्मृतः द्योशब्देन
सस्मृतोः स्मृताद्यौ द्यौः द्यावौ द्यावः इति स्वरान्ताः पुंलिङ्गाः आपः आदन्तादावन्तात्परस्य सेर्लोपो
भवति अदन्तात्किम् इति खट्वा गौ आदन्तादावन्तात्परस्यौरी भवति गंगे गंगाः पिपीः आदन्ताद







वेतास्य ये इरी भवति हे गंगे गंगाम् गंगे गंगाः टौसोरे आदंतस्यावेतस्य टौसोरेत्वं भवति गंगया हि-
तौ यट् आदंतादावेतास्य ङेषां ङे ङसि ङस् ङीनां यडागमो भवति गंगायै गंगायाः आम्ङेः आदंतादावेता
स्य ङेराम् आदेशो भवति गंगायाम् गंगयोः गंगासु एवं श्रद्धा मेधा इत्यादयः अम्बादीनां ह्रस्वा
नां धौ ह्रस्वः हे अम्ब हे अक्क हे अल्ल ह्रस्वनाम्नामिति किम् हे अंबिके परोक्ष आदंतास्यावेः प
रस्य पट् स्सडागमो भवति पूर्वस्य चापोकारः सर्वस्यै सर्वस्याः सर्वासाम् सर्वस्याम् एवं विश्वादयः
आदंताः जरा जरसौ जरे जरसः जराः द्विकसमासे वहुव्रीहौ सर्वादेर्वा सर्वकार्यम् दक्षिणपूर्वस्यै
दक्षिणपूर्वायै उत्तरपूर्वस्याः उत्तरपूर्वायाः अन्तरस्यै शालायै वा स्यात् वहिर्योगे अपुरीमध्ये नैन अन्तरा
यै नगरायै विभाषाप्रकरणे द्वितीयस्यापि संख्यानम् द्वितीयस्यै द्वितीयायै तृतीयस्याः तृतीयायाः
नासिकायाः नस् नासिकानसः नासिकया नसा नोभ्याम् नासिकाभ्यां एवं च सर्वत्र गं मावन् पृ
तनायाः पृतः पृतनाभ्याम् निशायाः निशः निशा ष्कुगयानादेशः ष्ककारांतस्य शकारांतस्य च
कारांतस्य च राजयजमृजसृजभ्रस्जव्रश्चभ्राजादेः षकारो भवति धातोर्के सपरेत्वात् स्मरे
परे परतो नेच षोडः निड्भ्यां निशाभ्याम् निट्सु निट्त्सु केचित्तु थान्तो वेवषत्वमाहुः तन्मते न भेज
भ इति निज्भ्याम् निशब्दश्रुतेन गोपा सोमपावत् बुद्धिः बुद्धी बुद्धयः इडभ्याम् स्त्रियां वर्तमाना
भ्यामिकारोकाराभ्यां परेषां ङितां वचनानां वाडागमो भवति बुद्ध्यै बुद्धये बुद्ध्याः बुद्धेः स्त्रियो योः व

ग्राम् ग्रहणादामोभावश्चामोप्यभावः वृद्धौ एवं मतिभूतिनत्यादयः धेनुरज्जुदन्तादयोप्येवम् त्रिच
तस्रोः स्त्रियां तिसृचतसृवत् स्त्रियां वर्त्तमानयोस्त्रिचतुरोः द्वयोः तिसृचतसृ इत्येतावादेशौ भवतः
विभक्तौ सकारस्य रकारवत् ऋतो रात् ऋकारान्न भवति सेरा परे ऋन भवति तिस्रः २ तिसृभिः
तिसृभ्यः २ न तिसृचतसोर्नामि दीर्घः तिसृणाम् स्त्रियामिति किं त्रिविशेषणान्नेह प्रियास्त्रयो
[illegible] यस्याः सा प्रियत्रिः वृद्धिवत् आमि प्रियत्रयाणाम् एवं त्रियाम [illegible] लिंगान्तरे गौणत्वे
नोस्ति प्रियास्तिस्रो यस्य सः प्रियतिसा हे प्रियतिसः प्रियतिस्रौ प्रियतिस्रः नाम्यासोर्लोपः प्रि
यतिसृम् प्रियतिस्रः प्रियास्तिस्रो यस्य तत् कुले प्रियत्रि कुलं किं तु त्रिमिति मिति त्रिस्रा तिसृत्वा [illegible] ते
प्रियतिसृ प्रियतिसृणी हादौ स्वरे वा विभक्तिषु वत् प्रियतिसृणा प्रियतिस्रा हे [illegible] प्रियतिसृ [illegible]
भ्यां २ द्वयोः २ द्वे सेपः से लोपः नदी नद्यौ नद्यः नदीम् नद्यौ नदीः नद्या [illegible] नद्यै नद्याः नदी
नाम् नद्याम् एवं ब्राह्मणी सखी कुमारी गौरी गोपादयः लक्ष्मीः [illegible] सिलोपः [illegible]
हे लात् विशेषं नदीवत् एवमन्ये नदीन्तं [illegible] स्त्री स्त्रीश्रुवोः स्त्रीश
[illegible] भवतः स्वरे परे स्त्रियौ स्त्रियः हे स्त्रि वाम्शसि [illegible]
भवति स्त्रियम् स्त्रीम् स्त्रियौ स्त्रियः स्त्रीः स्त्रिया स्त्रीभ्याम् स्त्रीभिः स्त्रियै स्त्रीणाम् स्त्रियाम्
स्त्रियमतिक्रान्तः अतिस्त्रिः अतिस्त्रियौ [illegible]






ऋषोः शब्दस्येवं एव यथार्थं नाम अतिस्त्रयः हे अतिस्त्रे हे अतिस्त्रियौ हे अतिस्त्रयः अतिस्त्रियम् अ
तिस्त्रिम् अतिस्त्रियः अतिस्त्रीन् अतिस्त्रिणा अतिस्त्रये अतिस्त्रेः २ अतिस्त्रियोः अतिस्त्रीणाम् अति
स्त्रौ अतिस्त्रिषु अस्यौकारे वृत्तिं स्यादम्शसोस्तु विभाषया इत्यादेशास्तु नान्यत्र स्त्रियः पुंस्त्वप्र
जने स्त्रीवेतनम् अतिस्त्रि अतिस्त्रिणी अतिस्त्रीणि अतिस्त्रिणा अतिस्त्रये अतिस्त्रिणे अतिस्त्रेः अति
स्त्रिणः अतिस्त्रीणाम् अतिस्त्रौ अतिस्त्रिणि स्त्रियां तु प्रायेणापुंवत् शासिस्त्रतिस्त्रीः अतिस्त्रियः अ
तिस्त्रिया इत्यादि अतिस्त्रयै अतिस्त्रये अतिस्त्रियाः अतिस्त्रेः अतिस्त्रियोः अतिस्त्रीणाम् अतिस्त्रियां
अतिस्त्रौ अतिस्त्रिषु श्रीः श्रियौ हे श्रीः वेष्टवः इयुवंनाद्धिता मङ्गास्त्री विना श्रियै श्रिये श्रियाः श्रि
यः श्रियोः इयुवंनादामोनुड्वा स्त्रियां तु नित्यम् श्रीणां श्रियाम् श्रियि ग्रहणमाभावेऽप्यामोऽप्य
भावः एवं धीः सुधीः प्रभृतयः भ्रूः प्रभृतयश्च प्रधीशब्दस्य लक्ष्मीवद्रूपम् केषांचिन्मते तु पुंवत् प्रकृ
ष्टा धीरिति विग्रहे लक्ष्मीवदेव अमित्रासिध्यम् प्रध्य इति विशेषः सुधीर्यस्याः सुष्ठु ध्यायति
चेति विग्रहे सुधीः लक्ष्मीवद्रूपम् केषांचिन्मते पुंवत् सुष्ठु धीरिति विग्रहे तु लक्ष्मीवदेव ग्रामणीः पुं
वत् एवं खलपूरिः नृताद्दूपू नकारान्तादकारान्ताद् णिंम् स्त्रियामीप्त्यमयो भवति क्रोष्टुः
क्रोष्टोः वधूजम्ब्वादयो नदीवत् पुनर्भूः पुनर्भ्वौ हे पुनर्भु पुनर्भूणाम् पुनर्भ्वाम् भेकां
पुनर्नवायां स्त्रीवर्षाभूः दर्दुरे पुमान् हे वर्षाभु स्वयंभूः पुंवत् नकारान्तसंख्यायाः स्वस्त्रादिस्तवत




स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄनेषु मातापितृवत् स्वसा कर्त्तृवत् एवं मातॄः स्वसॄः गाः ॰
वत् इति स्वरान्ताः स्त्रीलिंगाः अतोम् अकारान्तान्नपुंसकलिंगात्परयोः स्यमोः अम् भवति यथा फलम्
ईमौ नपुंसकलिंगात्परयोरौरीमापद्यते फले जश्शसोः शिः नपुंसकलिंगात्परयोर्जश्शसोः शि
र्भवति नुम्यमः नपुंसकस्य नुमागमो भवति शौ परे यमप्रत्याहारान्तस्य न फलानि २ हे फल
शेषं देववत् एवं मूल[कु]लादयः [पुन]त्यादेः अन्यादेः क्लीबात्परयोः स्यमोः [दत्]शो भवति अन्यत् वाव
साने अवसाने वर्त्तमानानां कसानां जबा भवंति चपा वा अन्यद् अन्ये अन्यानि अवत्तद्दत अन्या
देशेल्लोपो न हे अन्यत् इतरत् कतरत् कतमत् एकतरस्य न एकतरम् शेषं पूर्ववत् योयमाश्चित्यो
त्पद्यते सर्वे प्रति सन्निपातः सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति सर्वमादेशो सन्निपा
तपरिभाषया न जरस् अजरम् अजरसौ अजराणि न्नं सम्हतो यो दीर्घः पोव नं तस्यापूराश्
स्यमहत शब्दस्य दीर्घो भवति पंचस्वपि पोच अजरांसि अमिलर्कोपवारसंभावेवापित्वा
जरस् ततस्सन्निपातपरिभाषया न जरस् अजरसम् अजरम् अजरसौ अजरे अजरांसि अजराणि
शेषं निर्जरवत् हृदयोदकास्य मांसानां हृदुदनासन्मांसः हृदि हृद्भ्याम् उदानि उदा उद
भ्याम् आसानि आसा आसभ्याम् मांसि मांसा मांसभ्याम् नपुंसकस्य ह्रस्वः ग्रामणि कलवत्
नपुंसकात्स्यमोर्लुक् ग्रामणि ग्रामणीनपुंसके ग्रामणोवा देयस्य देवस्य नामिनः स्वरे नामन्तस्य



सा वं ११

नपुंसकस्यनमागमोभवतिस्यादौस्वरेपरे अस्थिनी लोपधायाः अस्थीनि अस्थ्ना अस्थ्नांशसादौ अ
स्थ्यादीनांनुमागमोभवति टाकारादौ स्वरेपरे इकारस्यवाकारः अल्लोपः स्वरे अस्थ्नुक्ताच्छसादौ
अस्थ्या अस्थ्ने अस्थ्नः अस्थ्नोः अस्थ्नाम् वेत्योः अस्थ्नि अस्थनि अस्थ्नि अस्थिषु एवंदधिसक्थ्यक्षि इति शब्दाः नदेतस्य
पीठिः प्रियास्या प्रतिदध्ना वारिवारिणी वारीणि वारीणाम् आमो नुट् वारिषु नपुंसकस्य ग्रामणि ग्रा
मणिनी ग्रामणीनि पुनस्त्वदत्तराद्यकः पुंस्कं पुंवत्त्वा अह्नितिमिने कोऽकपुंस्कं नाम्येतत्र
पुंसकलिंगेटादौस्वरेपरेपुंवद्वाभवति ग्रामण्या ग्रामणिना ग्रामण्याम् ग्रामणीनाम् ग्राम
ण्याम् ग्रामणिनि दधि दध्ना दधिना सुधि सुधिया सुधिना मधु मधुनी मधूनि २ हेमधो हे
मधु एवमम्बादयः सानुसानुनीसानूनि स्नुनासानुनास्नुभ्यां प्रियक्रोष्टु प्रियक्रोष्टुनी प्रिय
क्रोष्टूनि प्रियक्रोष्ट्रा प्रियक्रोष्ट्रवे प्रियक्रोष्टुने प्रियक्रोष्टुः प्रियक्रोष्ट्रोः प्रियक्रोष्टुनः खलु ख
लुनी खलूनि खल्वा खलुना एवंखल्वादयः धातृ धातृणी धातॄणि हे धातः हे धातृ एवंक
र्त्रादयः ह्रस्वादेशोसंध्यक्षराणामिकारोकारौवक्तव्यौ अतिरि अतिरिणी अतिरीणि
अतिराया अतिरिणा अतिरिभ्याम् अतिरिभिरित्यादि प्रद्यु प्रद्युनी प्रद्यूनि अतिनु अतिनुनी अ
तिनूनि अतिनावा अतिनुना इतिस्वरान्तानपुंसकलिंगाः अनडुह्शब्दस्य पुंसिपंचसुशौवान
डुहुआमागमोभवतिईप्सिता सावनडुहः अनडुहः सोर्नुमागम् संयोगान्तस्यलोपः स्यादौरसे ॥




पदांतेच सभित्रस्यरात्र अनड्वान् अनड्वाहौ अनड्वाहः पावम् चतुरनडुहोर्वामामोभवति
आम्रेहेअनडुन् वसांरसे वसस्तनडुभ्यनडुभ्याम् अनडुद्धस्त्येतेषांदत्वंभवतिरसेपदांतेच अन
डुत्सु अनडुत्व दादेर्घः आयोच्चारणेदादेर्धातोर्हकारस्यघत्वंभवति धातोर्झसेपरेनाम्न्यस्वर
सेपदांतेच आदिजबानां झभांतस्य झभाः स्ध्वोः धातोर्झभांतस्यावयवस्यादौवर्तमानानांज
बानांझभाभवंति सकारेध्वशब्देमकारेवपरेपदांतेच धुक् धुग् दुहौ दुहः दुग्भ्याम् धुक्षु
आयोच्चारणेकिम् दामलिट् गर्दभमाचष्टेगादेभयति गर्धप् होढः हकारस्य ढत्वंभवति धा
तोर्झसेपरे नाम्न्यस्वरसेपदांतेच लिट् लिड् लिहौ लिड्भ्याम् लिट्सु लिट्त्सु दुहादेर्वा दुहस्नुह
स्नुहद्रुहमुहांढत्वंवा ध्रुक् ध्रुग् ध्रुट् ध्रुड् ध्रुग्भ्याम् ध्रुड्भ्याम् ध्रुक्ष ध्रुट्सु ध्रुट्त्सु एवंमुहस्नुहस्निहः
वाहोवौशसादौस्वरे वाहोवाशब्दस्यौकारादेशोभवतिशसादौस्वरेपरे तद्धितेऽपिरुकारेच
विश्वौहः विश्वौहा विश्ववाड्भ्याम् विश्ववाड्भिः विश्ववाट्सु सहेः साढ् साड्वपेसन्तिसहेः
सस्यषोभवति तुराषाट् तुराषाड् तुरासाहौ तुरासाहः तुराषाड्भ्याम् तुराषाट्सु दिवऔ दि
वोन्त्यस्यौकारादेशोभवति सौपरे सद्यौः सदिवौ सदिवः उरसे दिव उदादेशोभवतिरसेपदां
तेच सद्युभ्याम् सद्युषु चतुर्णांशौतिसंवरूपवचनांतः चतुरामोच चतुर्णांतस्यामामोभवति
पंचमस्योच चत्वारः चतुरः चतुर्भिः चतुर्भ्यः २ रः संख्यायाः रेफान्तसंख्यायाः परस्यामोनुडागम

यकृ प्रियाश्चत्वारः


सा
वं
१२


मोभवतिचत्वारांचतसृस्थंवर्जितिनिर्देशाद्रेफस्यविसर्गो॥ प्रियाश्चत्वारोयस्य सः प्रियचत्वाः
प्रियचत्वारौ प्रियचत्वारः हे प्रियचत्वः गौणत्वेनुड् प्रियचत्वराम् स्थाने स्यादेव परमचत्वाराणाम् क
मले कमलौ वा वत्ताणाः कमलक कमलौ कमलस्य मोनोधातोः मांतस्य धातोर्मस्य नो भवति इसे
पदांतेवम्योश्चनस्यलोपोन प्रशान् प्रशामौ प्रशानस्य कः कौ के शेषंसर्ववत् इदमोयंपुंसि इ
दमः पुंसिसावयं भवति अयम् इदम् सः त्यदादेर्दकारस्य मत्वं भवति स्यादौ इमौ इमे त्यदादीनां
संबोधनाभावः इमम् इमौ इमान् अनटौसोः इदमोऽनादेशो भवति टौसोः परयोः अनेन अभ्यः
सकारभकारादौ पदे इदमो काराादेशो भवति कृतत्वस्य आभ्याम् भिसि भिस् इदम इस्मोभिसःभि
सैवभवतिनभकारस्याकारः एभिः अस्मै आभ्याम् एभ्यः २ अस्मात् आभ्याम् अस्य अनयोः २ एषा
म् अस्मिन् एषु इदमेतदोरन्वादेशे द्वितीयाटौस्स्वेनः एनम् एनौ एनान् एनेन एनयोः किंचित्
कार्यंविधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः यथानेन व्याकरणमधीतं
एनं छंदोध्यापय नोपधायाः नाम्नो नो लोपः शधौ राजा राजानौ राजानः हे राजन् अल्लोपः स्व
रे स्वरे प्रत्याहारसादौ नजोर्ज्ञः नकारजकारयोर्योगे ज्ञो भवति राज्ञः राज्ञा राजभ्याम् राजभिः
नस्य लोपो धीन विभक्तिकार्यम् पंचत्विति नाप काल राजनि राजनि एवं वृषादयः यज्वनः यज्व
ना यज्वभ्याम् यज्वसु आत्मनः आत्मना प्रतिदिवा अल्लोपे कृते घोविंद्से धातोरिड्नोदीर्घोम

१२



व्रतिरेफवकारयोर्हसपरयोः परतोनेव प्रतिदीव्नः प्रतिदिवभ्याम् प्रतिदिवस् श्वा श्वानौ श्वानः
श्वादेः श्वादेर्वकारस्य उत्वं प्राप्नोति शसादौ स्वरे परे ईपीकारे च शुनः शुना श्वभ्याम् श्वसु युवा यु
वानौ युवानः यूनः यूना युवभ्याम् युवसु मघवा मघवानौ मघवानः मघोनः मघोना ॥ मघव
तामन्तस्यावमन्तः ॥ नाञ्जाद्विहिन्त्यार्वेन्नन्तस्य तृ इत्ययमादेशः स्यात् असौ त्रिनान् उकारस्य त्वंच
सम्बकारान्तत्वं यस्य चत्वमागमो भवति पुंसि पंचस् अर्वन्तौ अर्वन्तः अर्वद्भ्याम् अर्वत्सु अनञ्जः
किं अनर्वाणौ अर्वासौ किम् अर्वा इत्यादेवस् मथिन् मथिन् ऋभुक्षिन् शब्दानामिकारस्याका
रादेशो भवति पुंसि पंचस् पथो च थोन्तृ पथिमथ्योस्थस्य न्थ भवति पुंसि पंचस् पथो च आसौ पथि
मथि ऋभुक्षां टेरात्वं भवति सौ परे पन्थाः पन्थानौ पन्थानः हे पन्थाः पन्थानम् पन्थानौ प
थोटेः मथिमथि ऋभुक्षां टेर्लोपो भवति शसादौ स्वरे ईपीकारे च पथः पथा पथिषु एवं मन्थाः
ऋभुक्षाः स्त्रियां नांतत्वादीप् सपथी समथी ऋभुक्षी परी क्लीबे सपथि वनम् योनपुंसका
नोनस्य लोपश्चादेसपथिनहेसपथिहेसपंथानि इत्यादयो सौ इन्हन्पूषन्नर्यमन् इत्येतेषां
शौ सौ चाधौपदे उपधायादीर्घो भवति नान्यत्र दंडी हे दंडिन् एवं मसालिन् यशस्विन् प्रभृतयः
वृत्रहा वृत्रहणौ हनो घ्ने हनेर्हकारस्य घो भवति नकारे ञ्मिणि च परे वसंयोगोत्पन्नेन वृत्र
घ्नः वृत्रहभ्याम् इत्यादि एवं पूषन्नर्यमन् प्रभृतयः संख्याशब्दाः पंचन्प्रभृतयो वक्तव्य नांताः







सा
वे
१३


षट्पाः जस्शसोर्लुक् षकारनकारान्तसंख्यायाः परयोर्जस्शसोर्लुग्भवति पंच २ पंचभिः पंचभ्य
ः षकारनकारान्तसंख्याया आमो नुट् पंचानाम् गौणत्वेन लुङ्नुटौ प्रियपंचा प्रियपंचानौ
प्रियपंचानः प्रियपंचानाम् एवं सप्तनवदशानामपि तथा अष्टनो दौ अष्टन्शब्दात्परयोर्जस्शसो
र्डौर्भवति अष्टौ २ अष्ट २ वा अस्योः अष्टनः सकारभकारादिविभक्तावात्वम् अष्टाभिः अष्टभिः अष्टा
भ्यः अष्टभ्यः अष्टानाम् अष्टसु अष्टासु प्रियाष्टा प्रियाष्टानौ प्रियाष्टानः प्रियाष्टः प्रियाष्टा प्रिया
ष्टाभ्याम् प्रियाष्टौ राजवत्संबोधने ह्रस्वः अष्टापंचेंद्रसे सुगण् सुगणौ सुगणः सुगणम् सुगणा
सु भुद्रुभृत् द्रुधौ द्रुधः द्रुग्भ्याम् द्रुत्सु वाक् वाग् वाचौ वाचः वाग्भ्याम् वाक्षु सकृत् सकृद्
सकृद्भ्यो सकृत्सु पुंसः पंचसु नृम् नृसमासइतिच दिशाम् दिश्दृश्स्पृश्दृषाम्
ऋत्व युज् युञ्जौ युञ्जः उष्णिहादीनामन्त्वं भवति स्यादौ रसे पदान्ते च युङ् युञ्जौ युञ्जः सम्रा
सेतस्पृक् चोःकुः चवर्गस्य कवर्गादेशो भवति धातोश्चे सेना न्यस्य रसे पदान्ते च सम्राक्ष्ये
स्पृग्भेदेन च शकृग्लृतिज् ऋत्विक् ऋत्विजौ ऋत्विजः ऋत्विग्भ्याम् ऋत्विक्षु व्रश्चभ्रस्जादेःषः सम्राट् सम्राड्
सम्राजौ सम्राजः देवेट् देवेड् देवेजौ देवेजः परिमृट् परिमृड् परिमृजौ परिमृजः विश्वसृट्
विश्वसृड् विश्वसृजौ विश्वस्य वसुराटोः दीर्घः विश्वावसुः विश्वाराट् विश्वाराड् विश्वाराजौ
विश्वाराजः विश्वाराड्भ्याम् विश्वाराट्सु विश्वाराट्त्सु स्कोराद्योश्च संयोगाद्योः सकारककार

१३






रयोर्लोपो भवति धातोर्कसेपरे नाम्नश्चरसे पदांतेव भृट् भृड् सम्प्रसृत्ते शात्स्य कभेन
ङ्ग इति जः भृज्जौ भृज्जः भृट्सु भृट्त्सु हृट् हृड् हृषौ हृषः विभ्राट् विभ्राड् विभ्राजौ विभ्राड्
भ्याम् विभ्राट्सु विभ्राट्त्सु ऋत्विक् ऋत्विग् ऋत्विजौ ऋत्विक्षु ऊर्क् ऊर्ग् ऊर्जौ ऊर्क्षु॥ तः स्य
रादेस्तस्य सत्वं भवति सोपरे स्यः त्यौ त्ये सः तौ ते सेत्तायां गोणात्वे चानुसत्वेन त्यत् त्यद् स्य
दो इति स्यत् यः यौ ये यः पतौ पते पतम् पतौ पतान् अन्वादेशे पतम् पतौ पतान् पतेन
पतयोः २ अग्निमत् अग्निमद् अग्निमथौ अग्निमथः अग्निमद्भ्याम् अग्निमत्सु अंचवतीति क्वि
पि कृते नोलोपः धातोर्हंसांतस्योपधाभूतस्य नकारस्य लोपः क्विति परे एतत्र्यायोन्वेतेन
निरुपपदात् क्रुञ्चेः क्विपिन अञ्चेः पुंसि पंचस्वनुम् दिशाम् प्रत्यङ् प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः
प्रत्यञ्चम् अञ्चेर्दीर्घश्च नलोपिनो नवतेरकारस्य लोपः पूर्वस्य दीर्घः शसादौ स्वरे तद्धित
यमवरयोर्दीर्घोकारेच प्रतीचः प्रतीचा प्रत्यग्भ्याम् प्रत्यक्षु तिर्यङ् तिर्यञ्चौ तिर्यञ्चः ति
रश्चादयः तिरश्चादयो निपात्यन्ते शसादौ स्वरे तद्धित यमवरयोर्दीर्घोकारेच तिरश्चः तिरश्चा
तिर्यग्भ्याम् तिर्यक्षु उदङ् उदञ्चौ उदञ्चः उदीचः उदीचा उदग्भ्याम् उदक्षु पितर
मंचतीति पित्रङ् पित्रञ्चौ पित्रञ्चः ऋतोदीर्घेन पितृचः पितृचा पित्रग्भ्याम् पित्रक्षु
सम्यङ् सम्यञ्चौ सम्यञ्चः समीचः समीचा प्राङ् प्राञ्चौ प्राञ्चः अञ्चेर्दीर्घश्च प्राचः



सा
वं
१५

प्राचा प्राक्षु पूजायांतु प्रत्यञ्चः प्रत्यञ्चा प्रत्यङ्भ्याम् प्रत्यक्षु उदञ्चः उदञ्चा उदङ्भ्याम् तिर्यञ्
चः तिर्यञ्चा तिर्यङ्भ्याम् सम्यञ्चः सम्यञ्चा सम्यङ्भ्याम् सध्र्यञ्चः प्राञ्चः प्राञ्चा प्राक्षु
अमुमञ्चतीति विग्रहे अदस् अद्र्यु इति स्थिते त्यदादेरद्रि अन्चु इति स्थिते इयमिति यत्वम् दस्य मः मा
दु रूपत्वं जनयोरुत्वः दीर्घस्य तदीर्घः अमुमुयङ् परतः केचिदिच्छन्ति केचिदिच्छन्ति सर्वत्र उभ
योः केचिदिच्छन्ति केचिदिच्छन्ति नोभयोः अमुमुईचः अमुमुयग्भ्याम् एवं अदमुयङ् अमुद्र्यङ् अमु
द्रीचः अदद्र्यङ् अदद्र्यञ्चौ अदद्रीचः अदद्र्यग्भ्याम् पूजायांतु अमुमुयञ्चः अमुमुयञ्चा अमुमु
यग्भ्याम् अदमुयञ्चः अदद्र्यञ्चः त्रिलोकम् अमहतो पौरीदीर्घः सौच महान् महान्तौ म
हान्तः हे महन् द्विरुक्तानां जक्षादीनां च शतृनुम्नयोर्वा ददत् ददतौ एवं जक्षत् जाग्रत् दरिद्र
त् चकासत् शासत् अत्वसोः सौ अत्वन्तस्याधातोरसन्तस्य चोपधाया दीर्घः सौ भवान् भवं
तौ हे भवन् वेट्त्मः प्रथानसेतस्येति किम् चीवरणीवस्ते सौचीवरवः प्राञ्जनस्यत् अत्वन्तत्वाभा
वान्नदीर्घः भवन् भवन्तौ पचन् दीव्यन् धीमान् हे धीमन् धीमन्तौ मघवान् मघवन्तौ मघवद्भ्याम्
गुप् गुब् गुपौ गुब्भ्याम् ताट्क् ताट्ग् ताट्शौ ताट्क्षु एवं यादृगादयः नशेः को वा पदान्ते नश्या
दीकस्यैवनकनग नट् नड् नशौ नग्भ्याम् नड्भ्याम् नक्षु नट्सु विट् विड् विशौ विड्भ्याम् दिशाम्
स्पृक् स्पृग् स्पृशौ हृतस्पृक् उदकं एवंस्यतत्कुत्वम् उदकस्पृट् उदकस्पृड् दधृक् दधृग्

१५




दधृषौ दधृषः रत्नमुट् रत्नमुड् रत्नमुषौ रत्नमुड्भ्याम् षष्शब्दो नित्यं बहुवचनान्तस्तिषसद्रूपः न
स्मासोर्लुक् षट् षड् १ षड्भिः षड्भ्यः २ ॥ उकारस्याणो भवति नामि परे षण्णाम् षट्सु षट्त्सु
परमषट् परमषड् परमषण्णाम् गौणत्वे न लुक् स्यात् प्रियषट् प्रियषड् प्रियषषौ प्रियषषः प्रि
यषषाम् दोषाम् दोषादीनां रेफो भवति रसे पदान्ते च दोः दोषौ शसादौ वा दोषन् दोषः दोष्णः
दोषा दोष्णा दोर्भ्याम् दोषभ्याम् दोष्णि दोषणि दोषि सविसर्गान्तं स्यान्निकारस्य च अव्ययवत् तथान्ये पि
किलान्यरसूषः दोःषु दोष्षु दोष्षु सोर्विर्हसे विपठीः विपठिषौ विपठीर्भ्याम् विपठीःषु विवि
ट् विविड् विविड्भ्याम् विविट्सु विविक्षौ स्कोराद्योश्च नट् नड् नक्षौ नक्षः गोरट् गोरड् गोरट्सु नतिरक्ष्योः संयोगा
न्तलोपस्त्वन्ये के नक् नग् गोरक् गोरग् कलोपे कत्वं सिद्धम् पिपक् पिपग् पिपक्षौ पिपक्षु एवं विवक् विवग्
विवक्षौ सुपीः सुपिषौ सुपीर्भ्याम् सुपीःषु सुपीष्षु एवं सजूः सजुषौ सजुषः विद्वान् विद्वांसौ हे
विद्वन् वसो वः उः वसोर्वकारस्योत्वं भवति शसादौ स्वरे न हि नपुंसके स्वरे च ईयोकारे च विदुषः
विदुषा विद्वद्भ्याम् विद्वत्सु सेदिवान् वस्योत्वे इडभावः सेदुषः सेदुषा सेदिवद्भ्याम् ऊषिवान् ऊ
षुषः ऊषिवद्भ्याम् शशकवान् शशकवांसौ नृथान्वोः शशकुषः शशकवद्भ्याम् श्वपरक्वसूसाद्
वयोद्धान्तो संयमत्वे सहित् सहिंसौ सहिन्भ्याम् सहिन्सु ध्वन्धसो ध्वद्भ्याम् एवं स्रस्त् पुंसोम
सुः पुंसो मस्ड्रादेशो भवति पुंसि परे च सर्वत्र च पुमान् पुमांसौ पुमांसः हे पुमन् पुंसः पुंसा पुंसु वेधाः

सा
वे
२८

वेधसौ हे वेधः वेधोभ्याम उशनसाम उशनस पुरुदंसस अनेहसां सेर्डा भवति उशना: उशन-
सौ धौ नो नलोपश्च वा वक्तव्या हे उशन हे उशनन हे उशनः उशनोभ्याम उशनस्सु सोमः
अदसोऽस्येस्सः सौ सेरौ अदसः सेरौ स्यात असौ दस्य सः सादे अदसोऽसाद्स्य ऊमभवति अमू
जसी परीवकत्वे अदसपकारस्य ईर्भवति वकत्वे अमी अमुम अमू अमून अमुना अमूभ्याम अमी
भिः अमुष्मै अमूभ्याम अमीभ्यः अमुष्मात अमूभ्याम अमीभ्यः अमुष्य अमुयोः अमीषाम अमुष्मि
न अमुयोः अमीषु इति हलन्ताः पुंलिंगाः नहो धः नहो हकारस्य धो भवति धातोः के से पदे ना
म्नस्य से पदांते च उपानत उपानद् उपानहौ उपानहः उपानत्सु उष्णिक उष्णिग उष्णिहौ उष्णि
ग्भ्याम द्यौः दिवौ दिवः उरसे द्युभ्याम द्युषु सोर्विह्वसे गीः गिरौ गीर्षु एवं पुरादयः चतस्रः प्र
तिचत्वा प्रियचत्वाः हे प्रियचत्वः इयं स्त्रियाम इदमस्त्रियामियम सौ इयम इमे इमाः इमाम इ
नया अस्यै अस्याः आभ्याम आभ्यः अस्याः अनयोः आसाम अस्याम अनयोः आसु अन्वादेशे
एनाम एने एनाः एनया एनयोः २ सकस्त जौ सरभ्याम सत्सु समित समिधौ समिद्भ्याम स
मित्सु स्या स्ये स्याः स्याम स्यया स्याभ्याम २ स्याभिः स्यस्यै स्याभ्यः २ एवं तद् यद् एतद् किं वाक् वा
चौ वाग्भ्याम वाक्षु ककुप ककुभौ ककुभ्याम ककुप्सु त्वक त्वचौ त्वक्सु त्वचः अपाह्नो
नित्यं बहुवचनान्तः स्त्रीसमहतो यौ दीर्घः शौच आपः अपः भिदयाम अपआश्रस्य दत्वं भवति भका

१५






गादौ विभक्तौ अद्भिः अद्भ्यः अपाम् अप्सु दिक् दिग् दिशौ दिग्भ्याम् दिक्षु दिड् दिट् दिशौ दिशाम् दृ
क् दृग् दृशौ सहजुष्वते सजूः सजुषौ सजूर्भ्याम् सजूःषु सजूष्षु आशीः आशिषौ आशीःषु आ
शीष्षु सौ सः सेदौ असौ अमू माद् अमूः अमुम् अमून् अमुना अमूभ्याम् अमूभिः अमुष्मै अ
मुष्याः अमूषाम् अमुष्मिन् अमुयोः अमुषु इति हसान्ताः स्त्रीलिंगाः स्वनडुत् स्वनडुही स्वनड्वां
हि पुनस्तद्वत् वाः वारौ वारि वार्भ्याम् वार्षु उद्रसे विमलद्यु विमलदिवी विमलदिवि किं के
कानि इदम् इमे इमानि अन्वादेशे एनत् एनद् एने एनानि ब्रह्म ब्रह्मणी ब्रह्माणि हे ब्रह्मन् अ
हः अहन्नकारस्य सो भवति रसेपदान्ते च अहः अह्नोः अह्नी अहनी अहानि पुनस्तद्वत् अह्ना अ
होभ्याम् कर्म कर्मणी कर्माणि एवं चर्म नर्म वर्म नर्मादयः दंडि दंडिनी दंडीनि स्रग्वि स्रग्विणी
स्रग्वीणि वाग्मि वाग्मिनी वाग्मीनि बहुवृत्रहत् बहुवृत्रहणी बहुवृत्रहणी बहुवृत्रहाणि बहुपू
ष्णी बहुपूषणी बहुपूषाणि बहुयम बहुयम्नी बहुयमणी बहुयमाणि असृक् असृजी
असृञ्जि शसादौ वा असन् असा असृजा असृग्भ्याम् ऊर्क् ऊर्जी ऊर्न्जि बहूर्जी नुम्प्रतिषे
धः केचिन्नुमं वा वानम् बहूर्नि बहूर्न्जि यत् यानि तत् तानि यत् यानि एतत् एते एता
नि अन्वादेशे एनत् एने एनानि एनेन एनयोः बेभित् बेभिदी बेभिदि शौ नुम् बेभिन्दि चेच्छिद् चेच्छि
दी चेच्छिदि गवाक् गवाञ्चि स्वरूपाणि क्लीवे चानि भेदतः असंख्यातानि मालोपेनैवापिकशानेमनम्

सा
वं
१९

16

सम्यक्प्रत्ययद्रुदौ षट्के सस्त्रीप्रतिज्ञस्भासोः तत्वादिशेषे दशके रूपाणीति विभावय गोऽर्वेत्यक्
गवाक् गवाग् गोअक् गोअग् गोक् गोग् गवाङ् गोअङ् गोङ् गोचौ गवाञ्चौ गोअञ्चौ गोञ्चौ
गवाञ्चि गोअञ्चि गोञ्चि गोचा गवाञ्चा गोअञ्चा गोञ्चा गवाग्भ्याम् गोअग्भ्याम् गो
ग्भ्याम् गवाङ्भ्याम् गोअङ्भ्याम् गोङ्भ्याम् गवाक्षु गोअक्षु गोक्षु गवाङ्क्षु गोअङ्क्षु गोङ्क्षु गवाङ्षु गोअङ्षु गोङ्षु
तिर्यक् तिरश्ची तिर्यञ्चि तिर्यङ् तिर्यञ्चौ यकृत् यकृती यकृन्ति यकानि यका यकृता यक
भ्याम् यकभ्याम् शकृत् शकृती शकृन्ति शकानि शका शकृता शकभ्याम् शकृद्भ्याम् ददत्
ददती ददंति एवं जाग्रदादयः वादीयोः शतृः प्रवर्गानात्परस्य शतृवोनुम ईकारे रेपि च तुदत्
तुदंती भात् भाती भांती श्यप्योरावित्यम् श्यप्रत्ययपरस्य यसंबन्धिनो कारान्तस्य शतृनित्यं नुम ई
कारे रेपि च पचे पचत् पचद् पचंती पचंति दीव्यत् दीव्यद् दीव्यंती दीव्यंति स्वप् स्वपी नसमहतो
धौदीर्घः शौच स्वाम्पि दीर्घो नेत्यके स्वम्पि स्वपा भिद्भ्याम् स्वब्भ्याम् स्वप्सु स्वपिस्वप्सु जगत् ज
गती जगंति महत् महती महांति धनुः धनुषी नुंषप्रवेस्य शोदीर्घः धनूंषि हविः हविषी हवीं
षि पयः पयसी पयांसि तेजः तेजसी तेजांसि वचः वचसी वचांसि पिपठीः पिपठिषी पिपठींषि
यत्त्वं तस्य शोनुस्व यावत् यावती यावंति तावद् तावती तावंति सर्पिः सर्पिषी सर्पींषि भ्र
दः [illegible] इति हलन्ता नपुंसकलिङ्गाः ॥ त्वमहं सिना सिसहितयोर्युष्मदस्मदोस्त्वमहं

१९







मित्येवादेशौ स्तः त्वम् अहम् युवावौ द्विवचने द्वित्ववाचिनोर्युष्मदस्मदोर्युवावौ भवतः विभ
क्तौ आमौ युष्मदस्मभ्यां परऔ आम् भवति युवाम् आवाम् यूयंवयं जसा जसा सहितयोर्युष्म
दस्मदोर्यूयंवयं भवतः यूयम् वयम् त्वमदेकत्वे युष्मदस्मदोस्त्वन्मदौ भवतः एकत्वे गम्यमाने
आम्सौ युष्मदस्मदोः शेरात्वं भवति अमि सकारे भिसि च परे त्वाम् माम् युवाम् आवाम् त्वदा
घेत्वेशसीनिरीचः शसो नो वक्तव्यः युष्मान् अस्मान् त्वन्मदादेशे कृते टाङ्योः युष्मदस्मदो
रेत्वं भवति टाङ्योः परयोः त्वया मया युवाभ्याम् आवाभ्याम् युष्माभिः अस्माभिः तुभ्यंमह्यंङ्या

ङ्या सहितयोर्युष्मदस्मदोस्तुभ्यंमह्यमेतौ भवतः तुभ्यम् मह्यम् युवाभ्याम् आवाभ्याम् भ्यसं

(margin: यभ्यम्)


युष्मदस्मद्भ्यां परो भ्यसं भवति शकारो भकारादित्वर्थः नेनात्वेत्वेन भवतः युष्मभ्यम् अ
स्मभ्यम् ङसिभ्यसोस्तः ङसि सहितयोस्त्वमौ भ्यसश्च परे त्वत् मत् युवाभ्याम् आवाभ्याम्
युष्मत् अस्मत् तवमम ङसा ङसा सहितयोर्युष्मदस्मदोस्तवममौ भवतः तव मम युवयोः
आवयोः साम् आकम् युष्मदस्मभ्यां परस्य साम आकं भवति युष्माकम् अस्माकम् त्वयि मयि
युवयोः आवयोः युष्मासु अस्मासु समस्यमानेष्वेकत्ववाचिनी युष्मदस्मदी समासार्थोन्यसं
ख्येऽपि युवावौ त्वन्मदावपि सिन्नसदेश्चस्यपात्यादेशाः स्युः सदैव ने त्वाहौ युवयौ तभ्यमह्यौ
तवममावपि एते परत्वाद्बाधंते युवावौ विषयेऽस्मिके त्वन्मदावपि बाधंते पूर्वे विशति षेधतः से


सा
वे
८

कसंख्यः समासार्थौ बहुर्थे युष्मदस्मदौ तयोरेकत्वार्थे त्वमौ वा वौ त्वन्मदौ न च त्वांमां वा तिक्रां
तो तित्वम् अत्यहम् अतित्वाम् अतिमाम् अतियूयम् अतिवयम् अतित्वाम् अतिमाम् अतित्वान् अ
तिमान् अतित्वया अतिमया अतित्वाभ्याम् अतिमाभ्याम् अतित्वभ्यम् अतिमभ्यम् अतित्वत् अति
मत् अतितव अतिमम अतित्वयोः अतिमयोः अतित्वाकम् अतिमाकम् अतित्वयि अतिमयि
अतित्वयोः अतिमयोः अतित्वासु अतिमासु युवामावां वातिक्रांत इति विग्रहे सिजस्तुस्सपा
ववत् अत्यत्र युवां वा यूयं युष्मानस्मान्वातिक्रांत इति विग्रहे सिजस्तुस्सुपाग्वत् अतियुष्मान् अत्य
स्मान् अतियुष्मान् अत्यस्मान् अतियुष्मया अत्यस्मया युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाभि
स्तेमेवान्नौवस्नसौ युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयासहितयोर्यथासंख्येनामी आदेशा भवे
ति तत्रैकवचने तेमे भवतः द्विवचने वांनौ भवतः बहुवचने वस्नसौ त्वामामा अमासहित
योर्युष्मदस्मदोस्त्वामा एतौ भवतः धीशस्त्वावतु मापीह दत्तात्ते मेपि शर्म सः स्वामी ते मेपि सह
रिः पातु वामपि नौ हरिः सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः सोव्याद्वो नः शिवं वो नो द
यात्सेव्योत्र वः स नः अन्वादेशे नित्यम् अनन्वादेशे वा धातौ तेन त्वं वा भक्तो ते ते हर
येनमः नादौ वाक्यादौ पादादौ वर्तमानयोर्युष्मदस्मदोर्नैते एकाक्यात्तेवा कामं त्वाम्पात्तमा
म्यात् वेदैरशेषैः संवेद्योस्मान्कृष्णः सर्वदावतु विशेष्यपूर्वसंबोधनेनापूर्वसंबोधने च हि

१२



त्वात्स्मात्संबोधनार्थयोर्नैते देवास्मात्पादिरित्यहे विसर्गोस्मात्परतसवेदा विशेष्यपूर्वोन्तहरे
कृपालोनः पादिसवेदारत्तदेवनः चादिभिश्च चवाहस्वहएवएभियोगेनैते शावयोश्चयोश्चशो
हरिर्मामेवरत्तव श्वचात्वषत्नानार्थयानभियोगेनैते चेनसात्वोसमीतते भक्तस्तवरूपंध्याय
ति वात्वषत्वानेनभक्तस्त्वापघएतिचत्वषा विद्यमानपूर्वोन्यथमांतानार्थयोरन्वादेशेप्येतेवा भ
क्तस्त्वमप्यर्हंतेन हरिस्त्वांत्रायतेसमाम् त्वामेतिवा, चादिनिपाताः, चवाहस्वहएव एवमन्नूनम्
पृथक्प्राध्वत् युगपत् भूयस् नह हेत विना नानास्वस्तिश्रुतिरोधानक्रम् मृषामिथ्या पृथ
पृथो सहोषसस् उच्चैसनीचैसशनैस् ऋधक्ऋतेआरात् दिवारात्रोसायम् चिरम् मनाक् ई
षत्जोषमतूष्णीम् बहिस् अवस्अधस् समयानिकषा स्वद्धाचेनत्वनसामिसनासनात् सनत्
तिरस् अंतरा अंतरेणासहसा अलम् वषट्तमा विहायसा अग्रा मिथोमिथस् प्रायस् मुहुस्
साथम् साकमसमम नमस् हिरुक्धिक् मामाहृत्वर् अंतर् प्रातर् पुनर् सनुतर् यावत् तावत्
स्वाहा स्वधा तथाहि खलु किल उषु सषु उपसर्गास्ताविभक्तिप्रतिरूपकाश्च अवदत्तम् अ
हंयुः हेलो अग्रा रेरे ऊरु पपे गोगो वाम पश्यत्कम् यथा कथा पाट् प्याट् अंग हैहे भो अये
चवविषुवेश्च एकपदे हाक् महत्त्व प्रात स्नात श्रौषट् वौषट् इत्यादि तन्नादिविभक्त्यर्थेति
यान्ते तस्मिन्निति तत्र यस्मिन्निति यत्र कुत्र कुह कतरस्मिन्कालेनदायदा कदा सदा सर्वदा







सा॰
वे॰
१८


एकदा अन्यदा तेन प्रकारेण तथा सर्वथा कथम् इत्थम् आद्यादिभ्यस्तः ततः यतः कुतः सर्वतः बहु
तः सार्वविभक्तिकस्तसिरित्येके आदितः मध्यतः अन्ततः पूर्वस्मिन्निति पुरः पुरस्तात् अधस्तात् ऊ
र्ध्वम् उपरि उपरिष्टात् परस्मिन्निति परे । दक्षिणेन दक्षिणात् दक्षिणतः उत्तरतः दक्षिणस्यां दिशि
दूरे दक्षिणाहि राज्ञाधीनं राजसात् सर्वं भस्मेति भस्मसात् ऊरी उररी उरी विस्तारांगीकारयोः सद्य
आदिकाले निपात्यते समानेऽहनि सद्यः अद्य अधुना इदानीं सम्प्रति साम्प्रतम् सम्प्रति कुरिति कु
त्सिति तूष्णीम् शश्वत् शीघ्रम् पूर्वेद्युः परेद्युः परेद्यवि पिशुनः पृथक् पराणि अन्येद्युः तर्हि यर्हि कर्हि
एतर्हि प्रादिरूपसर्गाः प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि
अपि प्रति उप आङ् श्रत् अन्तर् आविर् प्राग्धातोः उपसर्गा धातोः प्राक्प्रयोक्तव्याः तदव्ययम् अव्य
यसंज्ञं भवति कार्यं तेन क्वचित्प्रकरणात् यथा समवत् स्त्रिकाल सत्रामहत्याधनं अव्ययसंज्ञं भ
वति अव्ययादिभ्यः केवलं कर्तव्यं निर्देशो सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु वचनेषु च स
र्वेषु यन्न व्येति तदव्ययम् वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः आपं चैव हलन्तानां यथा वाचा
निशा दिशा अवतंसः वतंसः अपिधानम् पिधानम् इत्याद्युदाहरणानि आवतंसः स्त्रियाम् अकारान्तात्
स्त्रियां वर्तमानात् आप्प्रत्ययो भवति सर्वासामाप्स्यमेषा अजा एडका अश्वा चटका मूषि
काबाला वत्सा होढा मन्दा विलाता संफला भस्त्रफला अजिनफला शणफला पिंडफला स

स्वष्या शाकस्वष्या ग्रामकस्वष्या कोऽस्य स्वष्या गोत्र स्वष्या पकस्वष्या पूर्वा ऋल्वा ड्यादिष्टा देववि
शात्मेष्टाक निषाम ध्यमेति इयोगोपिकोकिला मालावपि ग्रमला इत्यादि ॥ पादोवाईप् ॥ द्वि
पदो द्विपात् कात्यनः कापिपरे एवं स्याकारस्येकारो भवति कारिका पाचिका अतः किम्
नौका लिपकारीनां न लिपका फवका वटका पकासका उपत्यका अधित्यका तारका
ज्योतिषि शुग्यवनादिका वर्णकातंतवे ग्रमवर्णिका वर्तका शाकुनो प्राचाम् उदीचां वर्ति
का अष्टका छाइ अष्टिका माक्षचिहा सूतका सूतिका पुत्रिका पुत्रका वृंदारका वृंदारिका
आर्यका आर्यिका चटकका चटकिका निर्भसका निर्भसिका एषका एषिका भस्त्रका भ
स्त्रिका तका तिका द्वके द्विके निःस्वका निःस्विका ॥ ऋस्वोवा ॥ स्त्रियां पूर्वस्य कापि परे तत्रा
दौ वक्तव्ये वा स्यात् गंगका गंगाका गंगिका नदिका नदीका खेपसिलरा खेपसीतरा
बाग्रहणाद एवं संध्यक्षराणात्र गोका नोका ॥ युणाईप् ॥ ईडिनी धानी मघोनी कवी पघलोपः
स्वर्णावर्णयोर्लोपो भवति नद्दिन यस्वरयोरपि च डीपदानी वैदी ईपनोलोपः राजो हि
राज्ञी स्त्रिनः षकारस्य काश्उकारमकारात्नवं पात्स्त्रियामीप् भवति षकारकी ढकरुचरी
इत्वरी ऋरुदचीऋरुदपसी ऋरुदचीऋरुमाची ॥ गोमती म पर्वती विदुषी रोक्षं तीनदनी
वारोपः शतः नदंती मव्रता प्रेप् सीमा सीमानी अनंता दऋचीदेन वऋयर्च्च वऋयत्वानोदा







ऽवा सीमा सीमे सीमाः दामा दामे दामाः बहुयज्वा बहुयज्वे बहुयज्वाः उपधालोपिनो वेप् बहु
राज्ञी बहुराज्ञ्यौ बहुराज्ञ्यः बहुराजा बहुराजानौ नदादेः अदंतात्स्त्रियामीप् नदी गौरी सौपर्णी
शालिकी चौरी सैरणी पौत्री घातकी कौमारी कौपी गार्गी गार्ग्यायणीत्यादि अनंत्यवयोवाचि
नोऽदंतात्स्त्रियामीप् कुमारी किशोरी वधूटी चिरंटी तरुणी तलुनी अनंत्य इति किम् वृद्धा स्थवि
रा अदंतात्किम् शिशुः ऊधसोनंतस्य बहुव्रीहेर्नङ् स्त्रियाम् कुंडोध्नी घटोध्नी वयोवाचिनो हायन
स्य द्विवत्सरेभ्यां णत्वम् त्रिहायणी चतुर्हायणी इंद्रादेरानीप् स्त्रियां पुंयोगे इंद्राणी भवानी श
र्वाणी रुद्राणी वरुणानी मृडानी आचार्यात् णत्वं च आचार्याणी हिमारण्ययोर्महत्त्वे महद्धि
मं हिमानी अरण्यानी यवाद्दोषे दुष्टो यवो यवानी यवनाल्लिप्याम् यवनानी मातुलोपाध्या
याभ्यां वा मातुलानी मातुली उपाध्यायानी उपाध्यायी अपुंयोगे स्त्रियोपाध्यायेभ्यो वा स्वार्थे अ
र्याणी अर्या क्षत्रियाणी क्षत्रिया उपाध्यायानी उपाध्याया पुंयोगाख्या अदंतात्स्त्रियामीप् पृथ्
वी गणकी पालकांतान्न गोपालिका अश्वपालिका सूर्याद्देवतायामाप् सूर्यस्य स्त्री देवता
सूर्या अन्या सूरी जातेरयोपधात् जातिवाचिनो यकारोपधाद्दंतात्स्त्रियामीप् ब्राह्मणी
वृषली यकारोपधान्न क्षत्रिया वैश्या क्वचिन्न बलाका गवयहयमुकयमत्स्यमनुष्याणां
प्रतिषेधः गवयीहयीमुकयीः समासे हितस्येति यलोपः मनुषी सूर्या गार्ग्या योरीपि मत्सी



गार्गी तिष्यपुष्ययोर्नक्षत्राणि यलोपः तैषी पौषी ईयिमत्स्यस्य यलोपः मत्सी पाकेकर्णेति कंश
न्या गोणीआवपने गोणामत्रा स्थलीअकृत्रिमायाम् भाजीश्राणाचेत् नागीस्थूलाचेत् काली
वर्णाश्चेत् नीलीओषधिप्राणिसंज्ञायांवा कुशी अयोविकारश्चेत् कामुकीमैथुनेच्छायाम् कब
रीकेशविन्यासे गोणाद्वा गोणी गोणा बहुव्रीहेर्नोतिपूर्वपदान्तनोन्तात् ऊरुभित्री न्ना
तोन्नात्र देवजाता अस्वांगपूर्वपदाद्वा सुरापीतीपाणिगृहीतीभार्यायाम् अन्यापाणिगृही
ता क्रीतान्तात्करणादेः वस्त्रक्रीतीक्वचिन्न धनक्रीता क्तान्तादल्पाख्ये अभ्रलिप्तीद्यौः अल्पतोकि
मवेदनलिप्तान्या स्वांगाद्वा स्वांगवाविनोर्दन्तादसंयोगोपधाद्वा स्त्रियामीप् सुमुखी सुमुखा
सकेशीसकेशा नासिकोदरौष्ठजंघादन्तकर्णशृंगाद्वा तुंगनासिकी तुंगनासिका मंदोदरी
मंदोदरा बिम्बोष्ठी बिंबोष्ठा एवं सजंघी सदंती सकर्णी सशृंगी अंगगात्रकंठेभ्यश्च स्वं
गी स्वगात्री सकंठी सपुच्छी एते स्वंगेभ्यादि कबरमणिविषशरेभ्यः पुच्छान्नित्यम् कबरपुच्छी
मणिपुच्छी विषपुच्छी शरपुच्छी उपमानात्पक्षपुच्छाभ्याम् घेपनपक्षी घेपनपुच्छी नक्रोडादिब
ह्वचात् कल्याणक्रोडा सुजघना सहनञ्विद्यमानपूर्वाच्च सकेशा अकेशा विद्यमाननासि
का नखमुखात्संज्ञायाम् शूर्पणखा गौरमुखा संज्ञायां किम् ताम्रमुखी कन्या दिनोगणात्
उक्तान्नूणवाविनोवास्त्रियामीप् पट्वी पटुः बह्वादेश्च बह्वी बहुः त्वसंयोगोपधात्र खरुः पांडुः





सा॰ वं २०

कृदिकारादक्तिनो वा रात्रिः रात्री शकटिः शकटी अक्तिनः किम् भूतिः अजननिः पद्धत्यादिभ्यो वा

